## ।। अथ अष्टचत्वारिंशोऽध्याय: ।। Chapter-48

वसिष्ठ उवाच: ततो गच्छेन्नृपश्रेष्ठ वल्मीकेश्वरमुत्तमम् ।।
तस्यैवोत्तरतो लिंगं विद्यते सर्वसिद्धिदम् ।। १

आसीद्भृगुकुले पूर्वं द्विज: कश्चिन्नाराधिप ।।
मन्दबुद्धिरहंकारी स्वधास्वाहाविवर्जित: ।। २

सप्रयषौ वनं दैवात् गार्हस्थ्यमार्गमाश्रित: ।।
प्रदध्यौ जीवनोपायं पत्न्याश्चैवात्मनस्तदा ।। ३

नैव प्रतिगृहं कश्चित्तस्मै ददौ कदाचन ।।
वेदाध्ययन ब्राह्मस्य वर्जितस्य च कर्मभि: ।। ४

ततो बुद्धि: समुत्पन्ना दस्युवृत्तौ दुरात्मन: ।।
अरण्ये मार्गसंभेदे कृत्रीत् पादपाकुले ।। ५

स्थित: स पथिकान्नित्यं पराभूय बलान्नृप ।।
गृह्णाति धनमेकाकी कुटुम्बपरिपुष्टये ।। ६

कदाचिदथ तत्रैव तीर्थयात्रापरायणा: ।।
सप्त सप्तर्षयो राजंस्तेजोदीपितदिङ्मुखा: ।। ७

-0-0-

१ ४ बी स प्राप्तयौवनो दैवाद्द्व गार्हस्थ्य मार्गमाश्रित :

३ १ बी श्लोक वेदाध्ययन:----- दुरात्मन: -- में नहीं है ।

६ १ बी सम्प्राप्ता ऋषियो राजन् तेजोदीपितदिमुखा । ऋषि सप्तर्षयो

२ ४ ए गृहं

४ १ ए पादवाकुले

५ १ ए गृहणा

८ ३ ए दिगं

३ ४ ए ब्राह्मस्य

६ ए कुण्टुव

तेषां रत्नमयान् दृष्ट्वा भासमानान् कमण्डलून्[1]
आदाय मुग्दरं भीमं हन्तुंच कृतवान् द्विजः ॥ ८

ततस्ते मुनयो मार्गे दृष्ट्वा तं चौररूपिणम् ॥
मूर्खं भृगुकुले जातं द्विजं सत्कर्मवर्जितम् ॥ ९

स्थितं मुद्गरमादाय कमण्डलुजिघृक्षया ॥
कृपया परयाविष्टास्तमूचुर्मधुराक्षरम् ॥ १०

सप्तर्षय ऊचुः- कस्य हेतोर्महत्पापमिदं भो क्रियते त्वया ॥
अध्रुवेण शरीरेण मानुर्यौवनहारिणा ॥ ११

यद्वा तद्वा परद्रव्यमपि सर्षपमात्रकम् ॥
अपहृत्य नरो याति नरकं नात्र संशयः ॥ १२

पोषणाय बहूनां यः कुर्यादेकोतिपातकम् ॥
स प्रेत्य सुचिरं भुक्ते[2] तस्यैकः कर्मणः फलम् ॥ १३

गत्वाशु गृहिणीं पृच्छ यदर्थं पापकृद्भवान् ॥
त्वया पापस्य भागोऽर्थं[3] भोग्यः किं वा मयैव हि ॥ १४

-०-०-

१ ए कमण्डलुन्
२ ए भुक्ते
३ ए पापस्य भागोऽर्थं भोग्यं

अथ सा कथयेत्त्वां हि तद्विचार्य कुरु प्रियम् ।।
वयमत्रैव तिष्ठामः सत्येनार्गलया धृताः ।। १५

वसिष्ठ उवाच :- तथेत्युक्त्वा ययौ शीघ्रं स तदा भार्गवो द्विजः ।।
आलयं निजमासाद्य गृहिणीमिदमब्रवीत् ।। १६

ब्राह्मण उवाच :- त्वदर्थं यन्मया पापमिदं वै क्रियते सदा ।।
तस्य भागस्त्वया प्राप्यः किमेकेन मयैव हि ।। १७

मया सप्तर्षयो रुद्धा मार्गे तस्करबुद्धिना[1] ।।
प्रेरयन्ति महात्मानः स्त्वां प्रष्टुमिदमादरात्[3] ।। १८

ब्राह्मण्युवाच :- न मे पापस्य भागोऽस्ति धन्यस्यैवास्ति केवलम् ।।
अपि पापशतं कृत्वा भर्तव्याहं त्वया विभो ।। १९

वस्त्रालंकरणादीनां तनोश्छायानुकारिणी ।।
न तु कर्मफलस्येह तथा भार्या भवेन्नृणाम् ।। २०

पातकं कुरुते कर्म यथा बुद्ध्या[4] नृणान्तु यः ।।
स च पापफलं मुक्ते[2] न तु बुद्धिः कथंचन ।। २१

-०-

१ बी मार्गे तस्कर बुद्धिना नास्ति
२ ए मुक्ते ३ ए पृष्टु ४ ए बुध्या

तथा शतानि पापानां कुटुम्बस्यार्थमाचरन् ।।
कर्तैव लिप्यते नान्य: सत्यमेतद्ब्रवीम्यहम् ।। २२

वसिष्ठ उवाच :- इत्युक्त: स तदा विप्रो भार्यया सुविदग्धया ।।
विषादं परमं प्राप्य ययौ यत्र महर्षय: ।। २३

मुर्दिरं तं परित्यज्य भार्यावाक्यं निवेद्य च ।।
पपात शिरसा भूमौ सप्तर्षीनिदमब्रवीत् ।। २४

ब्राह्मण उवाच :- संसारार्णवमग्नं मां संवृतं पापराशिभि: ।।
समुद्धरत कारुण्यात् सन्तो हि करुणाधना: ।। २५

सप्तर्षय:ऊचु: :- त्वया विप्रकुले भूत्वा न शुभं विहितं क्वचित् ।।
तस्मादीशस्त्वयाराध्यस्तपोभिरतिदुश्चरै: ।। २६

मेरुमन्दिरमात्राणि पापानीह कृतान्यपि ।।
शिवसंस्मरणै नैव विप्लवं यान्ति निश्चितम् ।। २७

-0-0-

किंपुनर्ये महेशाने मनो विन्यस्य निश्चलम् ।।
तप: कुर्वन्ति सुचिरं समाधिध्यानयोगत: ।। २८

ब्राह्मण उवाच :- मन्त्रं किमपि मे विप्रा: सुसिद्धं वै प्रयच्छत ।।
यदालम्बनमात्रेण चिन्तयामि परं शिवम् ।। २९

सप्तर्षय ऊचु: :- ॐ नम: परमार्थाय महाघौघविनाशिने ।।
अचिन्त्याय प्रधानाय पुरुषाय महात्मने ।। ३०

एवं ते जपतो विप्र परितुष्टो महेश्वर: ।।
प्रदास्यति परां सिद्धिं नात्र कार्या विचारणा ।। ३१

वसिष्ठ उवाच :- इत्युक्तवान्ते महात्मानो ययु: सप्तर्षयोऽमला ।।
स द्विजोऽपि विशुद्धात्मा तत्र तेपे महत्तप: ।। ३२

आराधयन् महादेवं जपन् मन्त्रं समाश्रित: ।।
तस्थौ वर्षशतं यावन्महा वल्मीकसंवृत: ।। ३३

पुन: सप्तर्षयो राजन् निर्मलास्तत्र संगता: ।।
वल्मीकरन्ध्रवक्त्रेभ्यो[1] ददृशुर्विस्फुरन्महः ।। ३४

१ ए वक्त्रेभ्यो

किमेतदितिवान्योन्यमुक्त्वा विस्मितचेतस:
यावद्विलोकनं चक्रुस्तावत् संददृशुर्द्विजम् ॥ ३५

पुरस्ताल्लिंगमुत्पन्नं दिव्यमद्भुतदर्शनम् ॥
तं दृष्ट्वा तु महल्लिंगं मुनयस्ते यतव्रता: ॥ ३६

क्रमादुत्सार्य वल्मीकमिदमूचुस्तपोधनम् ॥ ३७

सप्तर्षय ऊचु: भोभोस्तपोनिधे पश्य पुरस्ताल्लिंगमद्भुतम् ॥
तपोभिस्तव दु:पारै: प्रसन्नोऽभून्महेश्वर: ॥ ३८

वसिष्ठ उवाच :- इत्युक्तस्तैर्महात्मा स कृच्छ्रादुन्मील्य चक्षुषी ॥
व्यलोकयदुपान्तस्थान् सप्तर्षीन् दिव्यतेजस: ॥ ३९

चित्रालेख इव श्रीमान् तपोभिरतिदुर्बल: ॥
अशक्नुवन्नुपस्थातुं ववन्दे शिरसा मुनीन् ॥ ४०

बाहुभ्यामथ संगृह्य स्नापयां चक्रिरे मुदा ॥
सोयं सोयं मुनि: पूर्वं दस्युरूपेण य: पुरा ॥ ४१

-०-

१ बी चेतस:
१ ए अशुन्कुवनुपस्तातुं

आरौत्सीत् पथि यश्चास्मान् कमण्डलुजिघृक्षया ।।
परं वैराग्यमापन्नस्तप्तवानतुलं तप: ।। ४२

भार्गवोयं मुनिश्रेष्ठ: सर्वब्रह्मविदां वर: ।।
नमस्तपोभ्य: सततं प्रियेभ्यो महतामपि ।। ४३

यद्वशात्तस्करोप्येष बन्द्यो भूस्त्रिदिवौकसाम् ।। ४४

वसिष्ठ उवाच :- इत्थमायाचमानानां मुनीनामथ भारती
आकाशादभवद्दिव्या जीमूतस्येव गर्जित: ।। ४५

भारत्युवाच :- भार्गवोयं मुनिश्रेष्ठो बल्मिकादुद्गतोऽधुना ।।
युष्माभि: सप्तभिस्तस्माद्वाल्मीकिर्भविता भुवि ।। ४६

एतल्लिंगं समुद्भूतं पावनं पापिनामपि ।
बल्मिकोनाम लोकेषु वल्मीकेश्वरसंज्ञया ।। ४७

वैशाखस्य सिते पक्षे चतुर्दश्यां समाहित: ।।
य: स्नात्वा मानवो भक्त्या पूजयिष्यति मामिह ।। ४८

स यास्यति परं स्थानं जरामरणवर्जितम् ।। ४९

--०--०--

वसिष्ठ उवाच :-इत्युक्त्वान्तर्दधे[1] देवीसा नरेन्द्रसरस्वती ।।
अथवाल्मीकिमाहुस्तं पुराणास्ते महर्षयः ।। ५०

सप्तर्षयऊचुः :-वरं वरय भद्रं ते वाल्मीकब्रह्मवित्तम ।।
दास्यामस्तव संतुष्टा मनसा यद्वि वाञ्छति[2] ।। ५१

वाल्मीकिरुवाच:-यदि तुष्टा महात्मानः पुराणा मे महर्षयः ।।
विद्यास्थानानि सर्वाणि मां प्रयच्छ[3] तत्त्वतः ।। ५२

सप्तर्षय ऊचु : आदिकाव्यस्य कर्ता च लोके त्वं भविता द्विज ।।
तीर्थेऽत्र त्वां कृतस्नानो यो द्विजः पूजयिष्यति ।। ५३

पठतस्तस्य[4] शास्त्राणि पारंयास्यति सत्वरम् ।।
इह ये श्रद्धया युक्ता दास्यन्ति कनकं शुचि ।। ५४

तेषां लोका भविष्यन्ति ये केचिद्ब्रह्मचारिणाम् ।। ५५

वसिष्ठ उवाच :- इत्युक्त्वा भार्गवश्रेष्ठं वाल्मीकिं मुनिपुंगवाः ।।
ब्रह्मलोकं ययुर्हृष्टाः प्रशंसन्तस्तपो महत् ।। ५६

-०-

२ बी यद् यदिच्छति ( सि)

३ बी सर्वाणि भवान् यच्छतु तत्त्वतः

१ ए न्तदधे

४ ए पढत

वल्मीकिरपि देवेशं तत्र ध्यायन्नभवस्थित[1]: ।।

वल्मीकेश्वर माहात्म्यमिदं ते कथितं मया ।। ५७

श्रुत्वा यन्नु मानव: सम्यक् प्रजावानिह जायते ।। ५८

इति श्री वाल्मीकेश्वर महात्म्यंनाम अष्टचत्वारिंशोऽध्याय: ।। ४८ ।।

१ ए ध्यायभव